# वेदेषु विमानशास्त्रम् अन्तरिक्षयात्रा च

**Nirajakant**

Department of Sanskrit, Banaras Hindu University, Varanasi-5

***Abstract***

*Vimana (plane) Word has been used many times in Vedas but it doesn't mean aeroplane anywhere. For aeroplane in Vedas 'Divyaratha', 'Askashiya Nauka' etc. Words have been used. There are clear description of space journey also.*

*1. Structure of plane in Vedas.*

*2. Kinds of Plane.*

*(i) Plane which runs in space and on the Sea.*

*(ii) Plane which flies in air and runs on the earth.*

*(iii) Plane which runs under the sea.*

*(iv) Madhuvahana Ratha (Deluxe airbus).*

*(v) Automatic Plane.*

*3. Oil and Engine in Plane.*

*4. Defence by Plane.*

वेदाः न केवलं विश्वसंस्कृतेः आदिमो ग्रन्थः एवं अपितु सर्वासां विद्यानां विश्वेषां कलानाञ्च निधयः वर्तन्ते। इमे केवलं विश्वबन्धुत्वस्य विश्वकल्याणस्य, विश्वशान्तेश्च प्रथमोद्घोषकाः एव न सन्ति प्रत्युत तत्र मानवजीवनस्य सर्वविधकल्याणाय आधुनिकज्ञानविज्ञानयोः प्रामाणिकं विशदं च वर्णनं समुपलभ्यते। वेदेषु आधुनिकविज्ञानस्य प्रायः सर्वेऽप्यंशाः परोक्षापरोक्षतया उपनिबद्धाः सन्ति। शोधपत्रेऽस्मिन् "वेदेषु विमान-शास्त्रमन्तरिक्षयात्रा चेति" विषयमधिकृत्य मया किञ्चित् प्रस्तूयते।

*विमानस्य परिभाषा*-विमानशास्त्रविज्ञैः विमानस्य या परिभाषा कृता सेत्थं वर्त्तते-

*पृथिव्यप्स्वन्तरिक्षेषु खगवद् वेगतः स्वयम्।*
*यः समर्थो भवेद् गन्तुं स विमान इति स्मृतः।।*

अर्थात् विमानपदेन पूर्वं केवलम् आकाशचारि यानमेव न गृह्यते स्म अपितु पृथिव्याम् अप्सु, अन्तरिक्षेषु इति त्रिषु मार्गेषु सञ्चरणशीले याने एव तात्पर्यमासीत्।

*वेदेषु विमानशब्दप्रयोगः अर्थश्च*-वेदेषु "विमान" इति शब्दः बहुधा प्रयुक्तः, किन्तु न क्वापि तस्य अर्थः "वायुयानम्" इत्यस्ति। क्वचित् अस्य प्रयोगः अधिष्ठात्रर्थे, क्वचित् व्यवस्थापकार्थे, तु क्वचित् मापकाय पारगाम्यर्थे वा कृतः। तद्यथा ऋग्वेदस्य हिरण्यगर्भसूक्ते "रजसो विमानः"[१] अत्र विमानपदेन अधिष्ठाता मापको वार्थः गृह्यते। तथैव "रजसो विमानं रथम्"[२] इत्यत्र लोकानां पारगामी रथः इत्यर्थः वर्त्तते।

***वेदेषु विमानार्थे प्रयुक्तः शब्दः***-वेदेषु विमानार्थे 'दिव्यरथः' 'अन्तरिक्षनौका' वा शब्दः प्राप्यते। अन्तरिक्षनौकायै तत्र अन्तरिक्षप्रुत्[३] अन्तरिक्षप्रुट्[४] वा शब्दः प्रयुक्तः।

***वेदेषु अन्तरिक्षयात्रा***-अनेकेषु वेदमन्त्रेषु अन्तरिक्षायात्रायाः उल्लेखः प्राप्यते। ऋग्वेदे वर्णनं प्राप्यते यत् सोमेन स्वबुद्धिबलेन अन्तरिक्षयात्रायाः व्यवस्था क्रियते स्म।[५]

अथर्ववेद अन्तरिक्षमार्गाय 'देवयान' शब्दः प्रयुक्तः। तत्र चोक्तं यत् द्यावापृथिव्योः मध्ये बहवो देवयानाः सन्ति। व्यापारे येषां प्रयोगः धनलाभाय कल्प्यते स्म।

*विमानरचना*-वेदेषु विमानरचनासम्बद्धं किमपि विस्तृतं विवरणं नोपलभ्यते तथापि तत्सम्बद्धः स्पष्टः सङ्केतः प्राप्यते येन विमानस्य आकृतेः यन्त्रादीनाञ्च परिज्ञानं भवति।[६] विमानरचनासन्दर्भे एकेन मन्त्रेण ज्ञायते यत् निर्माणकार्ये काचित् त्रुटिः न स्यात् इत्यत्र विशेषावधानं भवति स्म। तद्यथा-"रथं ये चक्रुः सवृतं .......अविह्वरन्तम्।"[७] अथ च तत्र आसनमपि यथासुखं स्यात् भ्रमणे सौविध्यञ्च स्यात् इत्यत्रापि अवधानं भवति स्म। तद्यथा-

*"रथं ये चक्रुः सुवृतं नरेष्ठां......विश्वरूपाम्।*
'विश्वरूपा' इत्यनेन वर्णनानात्वं द्योत्यते।।'

वेदोत्तरवर्त्तिनः कतिचन प्राचीनाः वैज्ञानिकग्रन्थाः

समुपलभ्यन्ते यत्र विमानविद्यायाः प्राप्तिस्थलं वेदाः इत्यङ्गीकृतम्। यथोक्तं यन्त्रसर्वस्वे भरद्वाजेन--

*त्रयीसन्दोहसाररूपं सुखप्रदम्।*
*अनायासाद् व्योमयानस्वरूपज्ञानसाधनम्।*
*वैमानिकं प्रकरणं कथ्यतेऽस्मिन् यथाविधि।।*[८]

अग्रेऽपि भरद्वाजः वक्ति यत् वेदसमुद्रस्य मन्थनेन यत् नवनीतं प्राप्तं, तदाधृत्य ५०० सूत्रसमन्वितं वैमानिकं प्रकरणं प्रस्तूयते।[९]

*विमानप्रकाराः*-वेदेषु आकृत्या, सुख-सौविध्येन, गत्या च विमानस्य अनेके प्रकाराः उल्लिखिताः तत्र प्रमुखाः केचन प्रकाराः अधोलिखिताः सन्ति-

१. *त्रिकोणविमानम्* - ऋग्वेदस्य एकस्मिन् मन्त्रे सङ्केतः प्राप्यते यत् विमानं त्रिकोणं (त्रिवृता) त्रिचक्रयुक्तं, त्रयाणां उपवेष्टुं योग्यं (त्रिबन्धुरेण) च भवति स्म।[१०]

२. *दिव्यरथः ( सप्तचक्रयुक्तं विमानम् )*-एकस्मिन् मन्त्रे दिव्यरथस्य उल्लेखो वर्त्तते यत्र सप्तचक्राणि पञ्चचालनयन्त्राणि (इन्जन्स् इति) (रश्मयः) च भवन्ति स्म। विमानमिदं सर्वेषु लोकेषु गन्तुं सक्षमं विशालं सङ्केतगामि चासीत्।[११]

३. *स्वचालितविमानम्* - ऋग्वेदे ऋभुवेदस्य स्वचालितस्य दिव्यरथस्य वर्णनं प्राप्यते। त्रिचक्रयुतेऽस्मिन् विमाने अश्वाः कशा वा नासन् तथापि अन्तरिक्षे सर्वत्र पर्यटते स्म।[१२] अपरस्मिन् मन्त्रे मरुतदेवस्य स्वचालितविमानस्योल्लेखः अवाप्यते। अथ च विमानमिदम् अनश्वम् अरथि च सत् अनवरत चलति स्म।

४. *अन्तरिक्षसमुद्रगामि विमानम्*-ऋग्वेदे वर्णितमस्ति यत् अश्विनीयुगलस्य विमानं (नौका) अन्तरिक्षे समुद्रे च गन्तुं प्रभवति स्म। तत्र जलस्य न कश्चन दुष्प्रभावो लक्ष्यते स्म। तद्यथा-

*तमूहथुर्नौभिरात्मनवतीभि अन्तरिक्षप्रुद्भिरपोदकाभिः।।*[१३]

अत्र आत्मनवतीभिरिति पदेन सजीववत् चेष्टा अभिव्यज्यते।

५. *पृथिव्याकाशविचारि विमानम्* - अश्विनीकुमारद्वयस्य एकस्य विमानस्य उल्लेखेन ज्ञायते यत् यत् द्युलोके, पृथिव्यां वा सर्वत्र सञ्चरति स्म।[१४]

६. *मधुवाहनरथः* - ऋग्वेदे मधुवाहनरथेन प्रायः प्रचुरसौविध्यसम्पन्नेन विमानेन प्रयोजनमस्ति। यत्र त्रयः पवयः (वज्रतुल्यसुदृढ़चालनयन्त्राणि) आसन्। अनेन विमानेन अहोरात्रत्रयं अनवरतं यात्रा कर्तुं शक्यासीत्।[१५] 'विश्वसौभगः' इति पदेन सर्वसौविध्यसम्पन्नत्वं प्रद्योत्यते।[१६]

७. *त्रिपुराविमानम्* - ऋग्वेदे 'एकस्मिन्' मन्त्रे 'त्रिधातुना' इत्यनेन 'त्रिपुरविमानस्य' सङ्केतः प्राप्यते। अस्य विमानस्य वैशिष्ट्यं नाम अत्र त्रयः भागाः भवन्ति स्म। प्रथमः पृथिव्यां, द्वितीयो जलस्य अन्तः बहिश्च, अथ च तृतीयः आकाशे सञ्चालनाय उपयुज्यते स्म।[१७] अस्य निर्माणं त्रिनेत्रनामकेन विशिष्टलौहेन संभवति स्म। तद्यथा-

*तं युञ्जाथां मनसो यो जवीयान् त्रिधातुना पतथो विर्न पर्णैः।*[१८]

*विमाने अन्यानि सौविध्यानि*- ऋग्देवस्य एकेन मन्त्रेणावबुध्यते यत् विमाने प्रकाशस्य सुखासन्दस्य च व्यवस्थासीत्। स्वाभिज्ञानाय तत्र ध्वजस्यापि प्रयोगः क्रियते स्म। 'भूरिवारम्' इत्यनेन च तस्य लोकप्रियता ज्ञायते। तद्यथा-

*ज्योतिष्मन्तं केतुमन्तं त्रिचक्रं सुखं रथं सुषदं भूरिवारम्।।*[१९]

एकस्मिन् मन्त्रे विमानं ध्वनिविस्तारकयन्त्रस्य प्रयोगोऽपि वर्णितः[२०] विमाने आकर्षणयन्त्रमपि भवति स्म।[२१]

*विमाने चालनयन्त्रम् इन्धनश्च*-ऋग्वेदे एकस्मिन् मन्त्रे अवाप्यते यत् विमाने वज्रतुल्यं सुदृढचालनयन्त्रं (पविः) प्रयुज्यते स्म। यस्य सञ्चालनाय् तैलस्य (पारदं तत्तुल्यं वा किमपि स्नेहि द्रव्यम्) व्यवस्थापि आसीत्। 'पवि' इत्यनेन चालनयन्त्रस्य 'धृतवर्तनि' इत्यनेन च घृतवत् स्नेहयुक्तस्य पदार्थस्योल्लेखोऽपि वर्त्तते।

*विमाननिर्माता*-ऋग्वेदे एतेषां विमानानां निर्मातृत्वेन 'ऋभु' नाम्नः शिल्पिनः उल्लेखो विद्यते।[२२] तस्य गुणेन अनुरक्तैः ऋषिभिः तस्मै देवत्वस्योपाधिः प्रदत्तः।[२३]

*वेदोत्तरविमानशास्त्रस्य विकासः*-वेदोत्तरकालेऽपि अनेके वैज्ञानिकग्रन्थाः विद्यन्ते यत्र विमानविद्यायाः सुविशदं वर्णनमुपलभ्यते। तत्र ११ शतके भोजराजस्य "समराङ्गणसूत्रधारः" प्रसिद्धः। तत्र ३१ तमे अध्याये विमानयन्त्रस्य वर्णनं प्राप्यते। अन्ये प्रसिद्धाः केचन विमानविद्यायाः ग्रन्थाः निम्नलिखिताः सन्ति।

१. विमानचन्द्रिका - नारायणः
२. व्योमयानतन्त्रम् - शौनकः
३. यन्त्रकल्पः - गर्गः
४. यानबिन्दुः - वाचस्पतिः
५. खेटयानप्रदीपिका - चाक्रायणि
६. व्योमयानप्रकाशः - धुण्डिनाथः
७. यन्त्रसर्वस्वम् - भरद्वाजः
८. विमानचन्द्रिका - भरद्वाजः इत्यादि।

ऐषु ग्रन्थेषु विमानरचना, यन्त्राणां नामानि, विशेषविवरणं, विमानचालकस्य अधिकारी, विमानस्य १२गतयः, विमानप्रकाराः, विमानस्य २८ अङ्गानि, विमाने पारदप्रयोगः, १०३ मणीनां प्रयोगः, सौरऊर्जजा सञ्चालनव्यवस्था इत्यादि अनेके गुह्यतमाः विषयाः सङ्कलिताः सन्ति।

इत्थं ज्ञायते यत् विमानशास्त्रं पाश्चात्त्यानाम् अवदानं नास्ति अपितु वेदेषु तस्य प्रयोगः बाहुल्येन आसीत्। महीभृतां पार्श्वेऽपि स्वविमानम् आसीत् इत्यस्यापि उल्लेखः प्राप्यते।[२४] अतः इदानीम्

Vijnana Bharati

आवश्यकता अस्ति यत् यत्र आधुनिकविज्ञानस्य गतिः अवरुद्धा वर्तते वैदिकविज्ञानसहाय्येन वैदिकग्रन्थानाम् आलोचनेन शोधेन च तदर्थं नूतनमार्गः अन्वेष्टव्यः। येन आधुनिकविज्ञानस्य अवरोधः अपाकर्तुं शक्येत। तदैव "विज्ञानमुपास्व" तथा "विज्ञानमानन्दं ब्रह्म" इति वैदिकर्षीनां ध्येयं साकारं भवितमर्हतीति दिक्।

***सन्दर्भ :***


१. ०३।२६।०७

२. ऋ. २।४०।०३

३. नौभिः अन्तरिक्षप्रुद्भिः अपोदकाभिः. . . .। (ऋ.१।११६।०३)

४. द्रष्ट. तैत्तिरीय आ. १।१०।०२।

५. राजामेधाभिरीयते अन्तरिक्षेणयातवे (ऋ. ९।१५।१६) तथा च ९।६३।०८।

६. ये पन्थानो बहवो देवयाना अन्तरा द्यापृथिवी सञ्चरन्ति। (अथर्व. ३।१५।०२)

७. द्रष्ट.- यन्त्रसर्वस्वम् (पृ. २-३)

८. ऋ.४।३६।०२

९. यन्त्रसर्व., पृ.१

१०. त्रिबन्धुरेण त्रिवृता रथेन, त्रिचक्रेण सुवृता यातमर्वाक् (ऋ. १।११८।०२)

११. सोमपूषणा रजसो विमानं सप्तचक्रं रथमविश्वमिन्वम्।
विषूवृतं मनसा युज्यमानं. . . . .पञ्चरश्मिम् ।। (ऋ.२।४०।०३)

१२. अनश्वो जातो अनमीशुरूक्त्यो स्थस्त्रिचक्रः परिवर्त्तते रजः (ऋ. ४।३६।०१)

१३. द्रष्ट. (ऋ. ३।५८।०८)

१४. ऋ.१।११६।३, तथा ४।४३।०५

१५. त्रयः पवयो मधुवाहने रथे। त्रिनक्तं याथः त्रिर्वश्विना दिवा।। (ऋ.१।३४।०२)

१६. त्रिचक्रो मधुवाहनो रथो. . .त्रिबन्धुरो मथवा विश्वसौमगः।। (ऋ.१।१५७।३)

१७. द्रष्ट. विमानसर्व. पृ. ३०३-३०४

१८. 'रथे वाणीची आहिता।' (ऋ.५।७५।०५)

१९. ऋ.१।१८३।१

२०. ऋ.८।५८।०३

२१. यवोर्हि यन्त्रं. . .अभ्यायं सेंन्या.। (ऋ.१।३४।०४)

२२. तक्षन् रथं सुवृत्तं विद्मनापसः......ऋभवः। (ऋ.१।१११।१)

२३. तेन देवत्वमृभवः समानश। (ऋ. ३।६०।०२)

२४. व्योमयानं विमानं वा पूर्वमासीत् महीभुजाम्।। (युक्तिकल्प. यान. ५०)